# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

<table>
<tr><td>कक्षा – शास्त्रितृतीयवर्षम् (SEM-5)</td><td rowspan="2">प्रश्नपत्रम् – १<br>(C.F.-3.5.5.Old)</td><td rowspan="2">गुणाः – ७०</td></tr>
<tr><td>विषयः – अनिवार्यसंस्कृतम्</td></tr>
<tr><td>दिनाङ्कः – ०४/१२/२०१८</td><td>ग्रन्थः उत्तररामचरितम् अङ्कः १तः३</td><td>समयः –१०.०० तः ०१.००</td></tr>
</table>

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेभ्यः द्वौ श्लोकौ ससन्दर्भं स्पष्टयत ।** **( १० )**

*(१) विश्वंभरा भगवती भवतीमसूत*
*राजा प्रजापतिसमो जनकः पिता ते।*
*तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां*
*येषां कुलेषु सेविता च गुरुर्वयं च॥*

*(२) प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-*
*र्दशनमुकुलैर्मुग्धालोकं शिशुर्दधती मुखम्।*
*ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-*
*रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः॥*

*(३) इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो*
*रसावस्याः स्पर्शो वपुषि बहुलश्चन्दन रसः।*
*अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः*
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः॥

**प्रश्नः २** *भवभूतेः जीवनपरिचयं वर्णयत।* **( अथवा )** **( १० )**

*उत्तररामचरितस्य प्रथमाङ्कस्य वैशिष्ट्यं वर्णयत।*

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितश्लोकेभ्यः द्वौ श्लोकौ ससन्दर्भं विविच्येताम् ।** **( १० )**

*(१) प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः*
*प्रकृत्या कल्याणी मतिरनवगीतः परिचयः।*
*पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं*
*रहस्यं साधूनामनुपधि विशुद्धं विजयते॥*

(२) कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन संपातिभि:-

घर्मस्त्रंसितबन्धनै: स्वकुसुमैरर्चन्ति गोदावरीम्।

छायापस्किरमाणविष्करमुखव्याकृष्टकीटत्वच:

कूजत्क्लान्तकपोतकुक्कुटकुला: कूले कुलायद्रुमा: ॥

(३) ऐते त्रे कुहरेषु गद्गदनदद्गोदावरीवारयो

मेघालम्बितमौलिनीलशिखरा: क्षोणीभृतो दाक्षिणा:।

अन्योन्यप्रतिपाघातसंकुलचलत्कल्लोलकोलाहलै-

रुत्तालास्त इमे गभीरपयस: पुण्या: सरित्सङ्गमा: ॥

**प्रश्न: ४** उत्तररामचरितस्य द्वितीयाङ्कस्य विष्कम्भकं व्याख्यात। **( १० )**

**( अथवा )**

उत्तररामचरितस्य द्वितीयाङ्के निरूपितस्य् दण्डकारण्यस्य वर्णनं कुरुत।

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितश्लोकेभ्य: द्वौ श्लोकौ ससन्दर्भं स्पष्टयत।** **( १० )**

(१) नवकुवलयस्निग्धैरङ्गैर्ददन्नयनोत्सवं –

सततमपि न: स्वेच्छादृश्यो नवो नव एव य:।

विकलकरण: पाण्डुच्छाय: शुचा परिदुर्बल:।

कथमपि स इत्युन्नेतव्यस्तथापि दृशो: प्रिय: ॥

(२) अयि कठोर यश: किल ते प्रियं किमयशो ननु घोरमत: परम्।

किमभवद्विपिने हरणीदृश: कथय नाथ कथं बत मन्यसे ॥

(३) पौलस्त्यस्य जटायुषा विघटित: कार्ष्णायसोऽयं रथ-

स्ते चैते पुरत: पिशाचवदना: कङ्कालशेषा: खरा:।

खड्गच्छिन्नजटायुपक्षतिरित: सीतां चलन्तीं वह –

न्नन्तव्यापृतविद्युदम्बुद इव द्यामभ्युदस्थादरि: ॥

**प्रश्न: ६** तमसा-मुरलयो: संवादो विविच्यताम्। **( १० )**

**( अथवा )**

सीताया: पात्रालेखनं कुरुत।

**चतुर्थान्वितिः**

**प्रश्नः ७ निम्नलिखितेभ्यो दशानां प्रश्नानां लघूत्तराणि लिखत । ( १० )**

*(१) आत्मनः अमृता कला का ?*

*(२) नान्दीश्लोके किं छन्दः ?*

*(३) उत्तररामचरिते कति अङ्काः सन्ति ?*

*(४) श्रीकण्ठपदलाञ्छनः कः ?*

*(५) यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः- इत्युक्तिं कः वदति ?*

*(६) ऋष्यशृङ्गाश्रमात् कः संप्राप्तः ?*

*(७) वासन्ती का अस्ति ?*

*(८) शम्बूकः कुत्र तपः चरति ?*

*(९) उत्तररामचरितस्य तृतीयाङ्के काः काः नद्यः उल्लिखिताः ?*

*(१०) सीतायाः अपरं नाम किम् ?*

*(११) सीतायाः सखी का ?*

*(१२) चन्द्रकेतुः कः अस्ति ?*

*(१३) कियच्चिरं वा मेघान्तरेण पूर्णचन्द्रस्य दर्शनम् इत्यस्याः उक्त्याः कोऽर्थः ?*

*(१४) उत्तररामचरितस्य तृतीयाङ्कस्य नाम किमस्ति ?*

*(१५) एकः एवः कः रसः ?*

--००--